"मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे"।
ददर्श शीला सा स्त्रीणां समूहं रक्तवाससां ॥
चतुर्द्दश्यामर्च्चयन्तं भक्त्या देवं पृथक् पृथक्"।
इति भविष्योत्तरीयान्मध्याह्नव्यापिनी तिथि-ग्राह्येति वाच्यं। पूर्व्वाह्णो वै देवानामिति श्रुत्यादिभिः पूर्व्वाह्णे दैवकृत्यविधानात्। विध्यसमभिव्याहृतार्थवादेन तद्बाधायोगात् किन्तु तस्यैव गौणकालबोधकं तत्। कालमाधवीयेऽप्येवं। भविष्येऽपि पूजाविधायको मध्याह्नो नोक्तः। यथा,—

"कृत्वा दर्भमयानन्तं वारिधान्यां निवेश्य च।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥
चतुर्द्दशफलैर्मूलैर्जलजैः कुसुमैरपि।
यवगोधूमशालीनां चूर्णैरेकतरस्य च ॥
कृत्वा पूपद्वयं तस्मै दद्यादेकं घृतान्वितं।
स्वयमेकन्तु भुञ्जीत करे बद्ध्वा सुडोरकं ॥
चतुर्द्दशग्रन्थियुक्तं कुङ्कुमेन विलेपितं।
सुविन्यस्तं विष्णुनामप्रतिग्रन्थिसमन्वितं।
चतुर्द्दशसूत्रमयं सूत्रं कार्पासमेव च" ॥ * ॥

पूजाडोरकबन्धनमन्त्रस्तु रत्नाकरे,—

"अनन्तसंसारमहासमुद्रे
मग्नान् समभ्युद्धर वासुदेव।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते" ॥

इति मन्त्रमुक्त्वा।
"अनेन डोरकं बद्ध्वा भोक्तव्यं सुस्थमानसैः"।
इत्यर्द्धं भविष्योत्तरीयं कालकौमुद्यां लिखितमिति ॥ * ॥ तथा,—

"पापोऽहं पापकर्म्माहं पापात्मा पापसम्भवः।
त्राहि मां पुण्डरीकाक्ष सर्व्वपापहरो भव ॥
अद्य मे सफलं जन्म जीवितञ्च सुजीवितं।
यत्तवाङ्घ्रियुगाम्भोजाग्रे मूर्द्धा मे भ्रमरायते" ॥

इत्याभ्यां नमस्कुर्य्यात्। अनन्तकथामप्यत्र शृण्वन्ति। इति तिथ्यादितत्त्वं ॥ * ॥ * ॥ अथ प्रयोगः। आचम्य स्वस्तिवाच्य सङ्कल्पं कुर्य्यात्,—"अद्य भाद्रे मासि शुक्ले पक्षे चतुर्द्दश्यां तिथावारभ्य अमुकगोत्रः श्रीअमुकः धनधान्यपुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा चतुर्द्दशवर्षपर्य्यन्तं भगवदनन्तभट्टारकपूजाचतुर्द्दशग्रन्थियुक्तडोरकमूलबन्धनकथाश्रवणब्राह्मणसंप्रदानकातपसिततण्डुलप्रस्थद्वयघटितपूपार्द्धोपकल्पनतदर्द्धात्मकार्द्धकभोजनरूपमनन्तव्रतमहं करिष्ये" इति सङ्कल्प्य सूक्तं पठेत् ॥ * ॥ ततो गुण्डिकया अष्टदलपद्मं निर्म्माय तन्मध्ये घटमारोप्य शालग्रामं वा चतुर्दिक्षु ध्वजां निवेश्य यथोक्तविधिना गणेशनवग्रहदिक्पालशिवदुर्गालक्ष्मीनारायणपूजां कृत्वा शक्रं ध्यायेत्,—"ॐ महेन्द्रं मत्तैरावतस्कन्धस्थं सहस्रनयनोज्ज्वलं। मणिकाञ्चनघटितनानालङ्कारभूषितं वज्रहस्तं शच्यन्वितं देवगन्धर्व्वगणैर्वृतं मुनिगणैः स्तूयमानं" ॥ एवं ध्यात्वा महेन्द्राय नमः एवं क्रमेण संपूज्य प्रणमेत्,—

"ॐ शक्रः सुरपतिश्चैव वज्रहस्तो महाबलः।
ऐरावतगजारूढ़ः सहस्राक्षो नमोऽस्तु ते" ॥

ततो हृत्पात्रे जलं संस्थाप्य हस्तं दत्त्वा समुद्रमावाहयेत्,—
ॐ गङ्गेचेत्यादिनावाह्य समुद्रं पूजयेत् ॥ * ॥
ततो भूतशुद्ध्यादिप्राणायामान्तं कृत्वा अनन्तं ध्यायेत्,—

"ॐ दिव्यसिंहासनासीनं देवेशं गरुड़ध्वजं।
शुक्लवर्णं चतुर्बाहुं नागयज्ञोपवीतिनं ॥
शङ्खचक्रगदापद्मधरं पीताम्बरं विभुं।
श्रिया वाण्या च संश्लिष्टं किरीटादिसमुज्ज्वलं ॥
फणाशतसमायुक्तं जगन्नाथं जगद्गुरुं।
अनन्तं चिन्तयेद्देवं नारदाद्यैरुपस्तुतं" ॥

एवं ध्यात्वा स्वशिरसि पुष्पं दत्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य।
आं हृदयाय नमः एवं षड़ङ्गानि विन्यस्य पुनर्ध्यात्वावाहयेत्।

"ॐ आगच्छानन्त देवेश पत्नीभ्यां वाहनान्वित।
गन्धर्व्वादिगणोपेत सान्निध्यमिह कल्पय" ॥

ततः पूजयेत्।
पाद्यं गृहीत्वा,—

"ॐ पाद्यं गृहाण देवेश सुरासुरमनोहरं।
तुष्टो मे भव देवेश नरसिंह नमोऽस्तु ते" ॥

अर्घ्यं गृहीत्वा,—

"अर्घ्यं गृहाण देवेश सुगन्धिकुङ्कुमान्वितं।
दूर्व्वाक्षतसमायुक्तं नमस्ते विश्वमूर्त्तये" ॥

आचमनीयं गृहीत्वा,—

"ॐ इदमाचमनीयन्ते दिव्यतोयोद्भवं प्रभो।
भक्त्या दत्तं मयानन्त नमस्ते पन्नगाधिप" ॥

एवं मधुपर्कं पुनराचमनीयं स्नानीयं वस्त्रयुग्मञ्च दद्यात् ॥ * ॥
गन्धः,—

"ॐ गन्धोऽयं देवदेवेश कुङ्कुमागुरुसम्भवः।
यथाशक्त्या मया दत्तो देवेश प्रतिगृह्यतां" ॥

पुष्पं,—

"ॐ पुष्पं गृहाण भोऽनन्त सुगन्धिद्रव्यमुत्तमं।
पद्मनाभ नमस्तेऽस्तु कुशलं कुरु सर्व्वदा" ॥

धूपः,—

"ॐ धूपोऽयं ते महाभाग दशाङ्गोऽगुरुणा सह।
मया दत्तः प्रभो विष्णो गृह्यतां सुरनायक" ॥

दीपः,—

"ॐ दीपं गृहाण भोऽनन्त जाज्वल्यमानमद्भुतं।
त्वं गृहाण सदा देव रक्ष मां घोरसागरात्" ॥

यज्ञोपवीतं,—

"ॐ ऋग्यजुःसाममन्त्रेण त्रिवृत्तं पद्मयोनिना।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवानघ" ॥

नैवेद्यं,—

"ॐ नानाभक्ष्यसमायुक्तं चतुर्द्दशफलैर्युतं।
भक्त्या सम्पादितं देव सपूपं गृह्यतां विभो" ॥*॥

ततो बलभद्रं संपूज्य स्तुतिं कुर्य्यात्,—

"ॐ बलभद्रं महात्मानं हलिनं लाङ्गलायुधं।
कादम्बरीमदोन्मत्तं नमामि बलदेवकं" ॥

तत आवरणदेवताः पूजयेत्।
ॐ गणेशाय नमः। एवं लोकपालेभ्यः। नवग्रहेभ्यः। अष्टवसुभ्यः। एकादशरुद्रेभ्यः। द्वादशादित्येभ्यः। अनन्तादिनागेभ्यः। मत्स्यादिदशावतारेभ्यः। मासेभ्यः। ऋतुभ्यः। वत्सरेभ्यः। धर्म्माय। अधर्म्माय। ज्ञानाय। अज्ञानाय। वैराग्याय। अवैराग्याय। ऐश्वर्य्याय। अनैश्वर्य्याय। शिवाय। दुर्गायै। पृथिव्यै। गङ्गायै। यमुनायै। महालक्ष्म्यै। सरस्वत्यै। गरुड़ाय। शङ्खाय। चक्राय। गदायै। पद्माय। कौस्तुभाय। सूर्य्यमण्डलाय। सोममण्डलाय। वह्निमण्डलाय। वायुमण्डलाय। सर्व्वेभ्यो देवेभ्यः। सर्व्वाभ्यो देवीभ्यः ॥ * ॥
ततः स्तुतिं पठेत्,—

"ॐ अनन्तसंसारमहासमुद्रे
मग्नं समभ्युद्धर वासुदेव।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते ॥
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥
हृदिस्थं सर्व्वदेवानां इन्द्रियाणां गुणातिगं।
सर्व्वपापहरं देवं प्रणमामि जनार्द्दनं ॥
अनन्तरूपेण बिभर्षि पृथ्वीं
अनन्तलक्ष्मीं विदधासि तुष्टः।
अनन्तभोगान् प्रददासि तुष्टः
अनन्तमोक्षं पुरुषे प्रहृष्टः ॥
प्रणमामि हृषीकेशं वासुदेवं जगद्गुरुं।
सृष्टिस्थितिविनाशानां कर्त्तारं प्रणमाम्यहं ॥
राक्षसानामरिं नौमि नौमि दैत्यविमर्द्दकं।
जगतां हितकर्त्तारं नौमि पङ्केरुहेक्षणं ॥
जन्मजन्मकृतं यच्च बाल्ययौवनवार्द्धके।
वृद्धिमाप्नोतु तत् पुण्यं पापं हर हलायुध ॥
भक्तिहीनं क्रियाहीनं मन्त्रहीनं यदर्च्चितं।
यथोद्दिष्टासिमां पूजां परिपूर्णां कुरुष्व मे ॥
पापोऽहं पापकर्म्माहं पापात्मा पापसम्भवः।
त्राहि मां पुण्डरीकाक्ष हरे संसारसागरात्" ॥

ततो घटस्थजलेन संप्रोक्ष्य करमूले डोरकं समर्पयेत्।

"ॐ इदं डोरमनन्ताख्यं चतुर्द्दशगुणात्मकं।
सर्व्वदेवमयं विष्णो स्वकरे धारयाम्यहं" ॥

ततो भोज्यमुत्सृजेत् ॥ * ॥

ततः कथां शृणुयात्।

यथा,—

अरण्यवासमुषितो युधिष्ठिरस्तपो वशी।
प्राप्तस्त्रैलोक्यनाथेन कृष्णेन परमात्मना ॥
कथोपकथनं जातं तयोस्तत्र प्रियाप्रियं।
विशेषेण च गोविन्दं पप्रच्छ च युधिष्ठिरः ॥*॥

युधिष्ठिर उवाच।

केन व्रतेन देवेश वाञ्छितं प्राप्यते फलं।
निष्पापाः सकला लोकाः भवन्ति जन्मजन्मनि ॥*॥

श्रीकृष्ण उवाच।